

श्री सीतारामचन्द्राभ्यां नमः

श्रीमते रामनन्दाचार्याय नमः

मन्त्ररत्न रामायणम् (जगद्गुरु श्रीपूर्णानन्दाचार्य 'सिद्धान्सार्वभौम' रचितं)

गुरुं बोधायनं व्यासं नत्त्वा सीतां च राघवम् ।

कुर्वे कल्याणदं मन्त्ररत्नरामायणं शुभम् ॥१॥

श्रीरामः सच्चिदानन्दो योगिनां रमणास्पदम् ।

जगत्सृष्ट्यादिहेतुश्च तस्माद् ब्रह्मपदेरितः ॥२॥

मद्क्रृते न सुराणां च क्षितेर्दुःखं च नङ्न्यक्षति ।

ततः सुरार्थितो रामश्चायोध्यायामवतारत् ॥३॥

रामः सर्वावतारी हि कौशल्यानन्दनोऽभवत् ।

पूर्णब्रह्मवतारोऽयं नास्य चांशावतारता ॥४॥

महद् यशश्च तन्नाम्नो नास्ति तादृक् ततोऽधिकः ।

ताटकां हतवान् रामो विश्वामित्रेण याचितः ॥५॥

चन्दनेनार्चितो रामो यज्ञरक्षां चकार हि।
अहिल्या च शिला भूता पादधूल्या समुद्धृता॥६॥
द्रष्टुं च मिथिला रामः कौशिकेन निदेशितः।
तत्र रामः शिवेष्वासं समुत्थाप्य बभञ्ज हि॥७॥
चक्रे च जानकीपाणिग्रहो रामेण शार्ङ्गिणा।
लोकेषु कीर्त्तिता कीर्ती रामस्याद्भुतकर्मणः॥८॥
रमया विष्णुवद् रामः शुशुभे सीतया सह।
स्तुतः परशुरामेण रामोऽयोध्यामगात् पुनः॥९॥
नौभूतो भवपाथोधेः श्री रामचरणौ शुभौ।
यदालम्बनतो लोकाः सायुज्यं बहवो गताः॥ १०॥
शपथपूर्वकं राजा कैकेय्यै च वरद्वयम्।
वने वासश्च रामस्य भरतस्याभिषेचनम्॥११॥
रघुवंशावतंसः श्री रामश्च पितुराज्ञया।
सानुजश्च ससीतश्च शृङ्गवेरपुरं ययौ॥१२॥
नन्दितश्च निषादेशः श्रीराममभिनन्द्य च।
श्रद्धया पूजयित्वा च सेवां चकार सर्वथा॥१३॥
प्रयागं गन्तुकामः श्रीरामो रथं ससारथिम्।
निवर्त्त्य नोकयाऽगच्छद् भागीरथ्याः परं तटम्॥ १४॥
पद्भ्यां रामः प्रयागस्थं भरद्वाजाश्रमं ययौ।
गङ्गायमुनयोः स्नात्वा चित्रकूटं ततो गतः॥१५॥
ये चासन् मुनयस्तत्र ते चापुः परमं सुखम्।
सभार्यं सानुजं दृष्ट्वा श्रीरामं सुषमाकरम्॥१६॥
श्रीमान् दशरथः प्राणैर्वियुक्तः पुत्रशोकतः।
दूतश्च प्रेषितः शीघ्रं रघेन चाशुगामिना॥१७॥

महर्षिणा वशिष्ठेन भरतानयनाय हि ।

ततश्च मातुलादेशाद् भरतस्त्वरयाऽऽगतः ॥१८॥

तेन श्रुतः पितुर्मृत्युर्वने वासश्च शार्ङ्गिणः ।

भरतः पितृसंस्कारं दुःखितः कृतवानथ ॥१९॥

रामं राज्येऽभिषेक्तुं च चित्रकूटं जगाम सः ।

तेन सम्प्रार्थितो रामो ददौ तस्मै स्वपादुके ॥ २०॥

महालम्बे च मन्वानो भरतः शिरसाऽवहत् ।

नन्दिग्रामे प्रतिष्ठाप्य श्रद्धया ते उपासिते ॥ २१॥

चन्द्रमुखश्च रामोऽथ जगाम दण्डकावनम् ।

खरादीन् राक्षसान् हत्वा सुग्रीवं समवाप हि ॥२२॥

द्राक् च वालिबधं कृत्वा सुग्रीवं कृतवान् नृपम् ।

रावणेन हता सीता चान्विष्टा वायुसूनुना ॥२३॥

ययौ लङ्कां च रामोऽथ सेतुं कृत्वा च वारिधौ ।

रावणं सबलं हत्वा नृपं कृत्वा विभीषणम् ॥२४॥

नत्वा सुरैर्यशो गीतं पुष्पवृष्टिर्दिवः कृता ।

ससीतः सगणोरामः पुष्पकेन पुरं ययौ ॥२५॥

मोदाद् भुक्त्वा च सद्राज्यं भ्रातृभिर्भरतादिभिः ।

साकेत हि गतो रामः सह पौरैश्च मुक्तिदः ॥२६॥

चिदानन्दार्यशिष्येण पूर्णानन्देन निर्मितम् ।

सुखदं भवतान्मन्त्ररत्नरामायणं शुभम् ॥२७॥